# ॥ वैष्णवनाट्यशास्त्रानुसारं नाटकनायकस्वरूपविमर्शनम् ॥

सनातन दास

प्रबन्धसारः

वैष्णवाचार्येण श्रीलरूपगोस्वामिना नाटकचन्द्रिकायां नाटकस्य लक्षणं सविशदं वर्णितम्। ग्रन्थेऽस्मिन् दशरूपकेषु केवलं नाटकस्यैव लक्षणानि समुपवर्णितानि। साहित्यदर्पणे तु दशरूपकाणां लक्षणानि सोदाहरणमुक्तानि। दर्पणकारेण सह नाटकेतररूपकाणां लक्षणादिविषयेषु श्रीरूपस्य नास्ति कश्चन विरोधः। परन्तु प्रधानरूपकस्य नाटकस्य लक्षणविषये विद्यते किञ्चिद्द्वैमत्यम्। नाटकगतसन्धिसन्ध्यन्तरादिविषयेषु वैलक्षण्यं विद्यते। नाटकस्य नायकविषयेऽपि साहित्यदर्पणाद्भिन्नं मतं प्रदर्शितं श्रीरूपगोस्वामिना। वस्तुतः वैष्णवसम्प्रदायदिशा नाटकस्य लक्षणं साहित्यदर्पणगतलक्षणाद्भिन्नं वर्तते। अतः वैष्णवकविना नाटकस्य वैष्णवानुकूललक्षणप्रदानाय नाटकचन्द्रिकेति ग्रन्थः प्रणीतः। येन ललितमाधवादिवैष्णवनाटकानां नाटकत्वं सिध्यति। नवरचितोऽयं नाटकलक्षणग्रन्थो भरतमुनेर्नाट्यशास्त्रानुसारी सिंहभूपालस्य रसार्णवसुधाकरानुसारी चेत्यकथयत्सः वैष्णवकविः। नाटकचन्द्रिकायाः प्रारम्भे उच्यते-

"वीक्ष्य भरतमुनिशास्त्रं रसपूर्वसुधाकरञ्च रमणीयम्।
लक्षणमतिसङ्क्षेपाद्विलिख्यते नाटकस्येदं॥
नातीव सङ्गतत्वात् भरतमुनेर्मतविरोधाच्च।
साहित्यदर्पणीया न गृहीता प्रक्रिया प्रायः॥"

[नाटकचन्द्रिका १-२]

अत्र श्रीरूपगोस्वामिना स्पष्टमेवोच्यते यन्नाट्यशास्त्रविरोधादसङ्गतत्वाच्च विश्वनाथस्य मतं न गृहीतम्। अर्थात् नाटकलक्षणविचारे साहित्यदर्पणान्नाटकचन्द्रिकायाः विद्यते किमपि विलक्षणं वैशिष्ट्यम्। नाटकलक्षणेषु नायकस्वरूपमपि वर्णितं भवति। नाटकस्य नायकः कथं भवेदिति विषये वैष्णवानां किमपि स्वकीयं मतं विद्यते। तस्मादत्र नायकस्वरूपवर्णने नाटकचन्द्रिकेति वैष्णवनाट्यशास्त्रस्य मौलिकत्वं

स्वातन्त्र्यं वा विचार्यते।
कूटशब्दाः- नायकः, रसः, दिव्यः, अदिव्यः, दिव्यादिव्यः, धीरोदात्तः, धीरललितः, राजर्षिः, पुरुषोत्तमः।

नायकः

नाटके नायकः खलु प्रधानं चरित्रम्। वैष्णवसम्प्रदायेषु श्रीकृष्णः एव सर्वोत्तमो नायकः। स खलु सर्वविधो नायकलक्षणसम्पन्नः पुरुषः।[1] भक्तिरसामृतसिन्धुः इति ग्रन्थे श्रीकृष्णः चतुःषष्ठीगुणसम्पन्नो नायकः इति कथितम्। अर्थात् श्रीकृष्णे नायकस्य सर्वविधानि लक्षणानि वर्तन्त एव। नाट्यशास्त्रादिग्रन्थेषु नायकस्य यानि वैशिष्ट्यानि प्रतिपादितानि तानि सर्वाण्यपि श्रीकृष्णे विद्यन्ते।[2] नायकेषु चतुःषष्ठीगुणात्मकस्य श्रीकृष्णस्य श्रेष्ठत्वसम्पादनाय नाटकचन्द्रिकायां तदनुकूललक्षणं विनिर्मितम्। नाटकस्य नायकः कथं भवेत्? तस्य वैशिष्ट्यं किम्? कतिविधाश्च नायकाः? कस्मिन् रसे को नायकः? इत्यादयः विषयाः सविशदं वैष्णवशास्त्रानुसारं चात्र प्रतिपादिताः।

लक्षणम्

नाटकचन्द्रिकायां नाटकस्य नायको दिव्यः अदिव्यो दिव्यादिव्यो वा भवतीति कथितम्। नाटकस्य नायको धीरः उदात्तश्च भवेत्। अर्थात् धीरोदात्तगुणसम्पन्नः पुरुषो नाटके नायको भवति। यथा रामः श्रीकृष्णश्च। भक्तिरसामृतसिन्धुग्रन्थे श्रीरूपेण वर्णितं धीरोदात्तस्य लक्षणम्-

"गम्भीरो विनयी क्षन्ता करुणः सुदृढव्रतः।
अकत्थनो गूढगर्वो धीरोदात्तः सुसत्त्वभृत्॥"

[भक्तिरसामृतसिन्धुः, दक्षिणः/१/२२६]

गम्भीरो विनयी क्षमावान् करुणः दृढव्रतः अविकत्थनो गूढगर्वो महासत्त्वश्चेति एवंविधो धीरोदात्तगुणसम्पन्नो नायको नाटके भवेत्। परन्तु सर्वोत्तमपुरुषः श्रीकृष्णो नायकश्चेत् ललितोऽपि भवति। अर्थात् धीरललितोऽपि श्रीकृष्णो नाटकस्य नायको भवेदिति।[3] श्रीकृष्णं व्यतिरिच्य अपरधीरललितः पुरुषः नाटकस्य नायको भवितुं नार्हति। केवलं कृष्णश्चेद्धीरललितोऽपि नाटकस्य नायकपदवाच्यं भवति।

धीरललितस्य लक्षणं भक्तिरसामृतसिन्धौ-

"विदग्धो नवतारुण्यः परिहासविशारदः।
निश्चिन्तो धीरललितः स्यात्प्रायः प्रेयसीवशः॥"

[भक्तिरसामृतसिन्धुः दक्षिणः/१/२३०]

अस्यार्थः स्पष्टः। अतः सिद्धान्तोऽयं यन्नाटकस्य नायकः धीरोदात्तगुणसम्पन्नो भवेत्। परन्तु यस्मिन्नाटके श्रीकृष्णो नायकः, तत्र स धीरललितगुणसम्पन्नोऽपि[4] नायकपदवाच्यतामेति। तदुक्तं नाटकचन्द्रिकायाम्-

"दिव्येन दिव्यादिव्येन तथाऽदिव्येन वा युतम्।
धीरेणाढ्यमुदात्तेन कृष्णश्चेल्ललितेन च॥"

[नाटकचन्द्रिका ७]

साहित्यदर्पणादिग्रन्थप्रतिपादितानि त्यागी, कृती, कुलीनः, सुश्रीकः, रूपयौवनोत्साही, दक्षः, तेजस्वीत्यादीनि नायकसामान्यलक्षणानि नाटकस्य नायके भवेयुरेव।[5] अधिकन्तु अत्रोक्तानि धीरोदात्तादिविशेषलक्षणान्यपि भवेयुः। श्रीरूपगोस्वामिमते धीरोदात्तगुणसम्पन्नो दिव्यः अदिव्यो दिव्यादिव्यो वा पुरुषो नाटके नायको भवेदिति। किन्तु यत्र श्रीकृष्णो नायकरूपेण प्रतिपन्नः, तत्र स धीरललितगुणयुक्तोऽपि नायकत्वेन स्वीक्रियते। अतः नाटके श्रीकृष्णनायके सति तस्य धीरललितत्वमपि न दोषाय। तदुक्तम्- 'कृष्णश्चेल्ललितेन च' इति। यथा- ललितमाधवनाटकस्य नायकः श्रीकृष्णः। ललितमाधवे श्रीकृष्णः धीरोदात्तगुणसम्पन्नः। तथापि लीलया तेन तत्र धीरललितगुणः अपि प्रकाशितः। अर्थात् भगवान् श्रीकृष्णः स्वभावतस्तत्र उदात्तनायकः। केवलं लीलया ललितभावं प्रकाशयामास। ललितमाधवस्यान्तिमे श्रीकृष्णस्य स्वभावोदात्तत्वं लीलाललितत्वञ्च नाट्यकारेणैवोद्घोषितम्। तत्रोक्तम्-

"नाटके समुचितामपीश्वरः स्वैरमप्रकटयन्नुदात्तताम्।[6]
अत्र मन्मथमनोहरो हरिर्लीलया ललितभावमाययौ॥"

[ललितमाधवम्]

तस्माल्ललितमाधवस्य नायकः चन्द्रिकासम्मतः वैष्णवालङ्कारशास्त्रसम्मतो वा। विदग्धमाधवस्यापि नायकः श्रीकृष्णो धीरललितगुणसम्पन्नः। भक्तिरसामृतसिन्धौ

श्रीकृष्णस्य ललितगुणवत्वं स्वीकृतम्। तत्रोक्तम्-

"गोविन्दे प्रकटं धीरललितत्वं प्रदृश्यते।
उदाहरन्ति नाट्याज्ञाः प्रायोऽत्र मकरध्वजम्।"

[भक्तिरसामृतसिन्धुः दक्षिणः/१/२३२]

साहित्यदर्पणानुसारेण विख्यातवंशोद्भवो धीरोदात्तगुणसम्पन्नः प्रतापवान् राजर्षिः[7] दिव्यो दिव्यादिव्यो वा गुणवान्पुरुषो नाटकस्य नायको भवेत्। अत्र साहित्यदर्पणवचनम्-

"प्रख्यातवंशो राजर्षिर्धीरोदात्तः प्रतापवान्।
दिव्योऽथ दिव्यादिव्यो वा गुणवान्नायको मतः॥"

[साहित्यदर्पणः ३/३०]

यथा- राजर्षिनायको दुष्यन्तः, दिव्यः श्रीकृष्णः, दिव्यादिव्यश्च श्रीरामचन्द्रः इति। केचन टीकाकाराः लक्षणस्थेन वा-शब्देन अदिव्यं नायकं सूचयन्ति।[8] तत्तु कष्टकल्पितम्। यतो राजर्षिनायक एव अदिव्यनायको भवितुमर्हति। पुनः वृत्तावपि विश्वनाथेन अदिव्यस्य ग्रहणं न कृतम्। यदि अदिव्यनायकः तेन स्वीकृतः स्यात्तर्हि वृत्तावेवोक्तं स्याद्यथापरे विषयाः।

विभागाः

श्रीरूपगोस्वामिमते नाटकस्य नायकाः त्रिविधाः भवन्ति। दिव्यनायको दिव्यादिव्यनायकः अदिव्यनायकश्चेति। एतेषां त्रिविधनायकानां लक्षणमपि तेन सोदाहरणमुक्तं नाटकचन्द्रिकायाम्। यस्य ऐश्वर्यं स्वयमेव प्रकटितं भवति स दिव्यो नायकः। यथा- श्रीकृष्णः। भगवतः श्रीकृष्णस्य देवत्वं प्रसिद्धमेव। श्रीरूपविरचितयोः ललितमाधवविदग्धमाधवनाटकयोः नायकः श्रीकृष्णः खलु दिव्यनायकः। पुनर्यः स्वभावतो दिव्योऽपि मनुष्यवदाचरति मनुष्यवच्चेष्टापरायणो वा भवति स दिव्यादिव्यो नायकः। यथा- श्रीरामचन्द्रः। रूपगोस्वामी दिव्यादिव्यनायकस्योदाहरणे 'रघूद्वहः' इत्युक्तवान्। उद्वहस्तु[9] पुत्रपर्यायवाची शब्दः। अर्थात् राघवो रामः एव दिव्यादिव्यो नायकः इति। पुनः सत्याचरणशीलो गुणवान्पुरुषः एव अदिव्यो नायकः। यथा- धर्मपुत्रो युधिष्ठिरः। महाभारते

युधिष्ठिरचरित्रं सर्वजनविदितम्। स च सत्यवादी, धर्मपरायणः, गुणवान्नृपः। अतः अदिव्यो नायकः। तदुक्तं नाटकचन्द्रिकायाम्-

"स्वयं प्रकटितैश्वर्यो दिव्यः कृष्णादिरीरितः।
दिव्योऽपि नरचेष्टत्वाद्दिव्यादिव्यो रघूद्वहः॥ अदिव्यो धर्मपुत्रादिः...।"
[नाटकचन्द्रिका ७]

रसार्णवसुधाकरे सिंहभूपालेन धीरोदात्तगुणान्वितो दिव्यो मानुषः (अदिव्यः) चेति द्विविधो नायकः स्वीकृतः।[10] अदिव्यनायकः श्रीरूपेणापि स्वीकृतः। किन्तु विश्वनाथेन अदिव्यनायकविषये न किमपि स्पष्टीकृतम्। राजर्षिदिव्ययोर्लक्षणमकृतेऽपि संशयनिवारणाय तु दिव्यादिव्यनायकस्य 'यो दिव्योऽप्यात्मनि नराभिमानी' इति लक्षणं वृत्तौ भणितं विश्वनाथेन। यो नायको देवत्वेन प्रसिद्धोऽपि मानुषरूपं प्राप्य कार्यं करोति भुवि सः दिव्यादिव्यो नायकः। यथा श्रीरामचन्द्रस्य नारायणावतारत्वात् दिव्यत्वम्, पुनः नररूपेण दशरथपुत्ररामरूपेण वा सीताविरहादौ विलापात् प्रजापालनादौ नृपभावाच्च तस्यादिव्यत्वं सिद्धम्। तस्मात् श्रीरामचन्द्रो दिव्यादिव्यो नायकः। रामचरणतर्कवागीशेन वृत्तिटीकायां दिव्यादिव्यनायकविषये भिन्नं मतं प्रदर्शितम्।[11] तन्मते दिव्यादिव्यो नायको युधिष्ठिरादिः। दुष्यन्तादिः राजर्षिनायक एव अदिव्यनायकः इति मन्यन्ते रामचरण-हरिदास-कृष्णमोहनादिटीकाकाराः। विश्वनाथेन तु अदिव्यः इति पदमस्वीकृत्य राजर्षिरिति पदं स्वीकृतं राज्ञो देवांशभूतात्। यतः मनुसंहितादौ राजा देवतारूपेणोल्लिखितः पूजितश्च। अपि च ईन्द्रादिभ्यो देवेभ्यो राजोत्पत्तिः सुविदिता एव। तस्माद्विश्वनाथस्य अदिव्यापेक्षया राजर्षिरिति पदग्रहणं युक्तम्।

**श्रेष्ठनायकः**

दिव्यो दिव्यादिव्यः अदिव्यश्चेत्येतेषु त्रिविधेषु नाटकनायकेषु दिव्यनायकः एव श्रेष्ठः इति नाटकचन्द्रिकायां निर्देशितम्। दिव्यनायकेषु पुनः भगवान् श्रीकृष्णः सर्वश्रेष्ठः। यतः सर्वेऽपि नायकनिष्ठगुणाः श्रीकृष्णे विद्यन्ते। स च पुरुषोत्तमः। चतुःषष्ठीगुणसम्पन्नो दिव्यपुरुषः श्रीकृष्ण एव श्रेष्ठो नायकः। गुणाधिक्यात् कृष्णः श्रेष्ठः। तदुक्तं नाटकचन्द्रिकाकारेण रूपगोस्वामिना-

"...एषु कृष्णो गुणाधिकः। नायकानां गुणाः सर्वे यत्र सर्वविधाः स्मृताः॥"

[नाटकचन्द्रिका ८]

श्रीकृष्णः सर्वगुणसम्पन्नः सर्वोत्तमो नायकः। तस्मात् वैष्णवनाट्यशास्त्रमते श्रृङ्गाररसप्रधाननाटके श्रीकृष्णः एव यथार्थो नायको भवति। तदुक्तं श्रीरूपगोस्वामिना नाटकचन्द्रिकायाम्-

"लालित्योदात्तयोरत्र व्यक्त्या शोभाभरोऽधिकः।
तेनैष नायको युक्तः श्रृङ्गारोत्तरनाटके॥"

[नाटकचन्द्रिका ९]

यस्मिन्नाटके अङ्गीरसः श्रृङ्गारः तत्र भगवान् श्रीकृष्णः एव योग्यो नायकः। श्रृङ्गाररसे परोढा नायिका उपपतिश्च नायको भवितुं नार्हतः।[12] किन्तु श्रीरूपगोस्वामिनोच्यते यत् परोढानायिकया सह उपपत्युर्मिलनं रसाभासत्वात् श्रृङ्गाररसे निषिद्धः इति नाट्यशास्त्रादिग्रन्थेषु यत्कथितं तत्तु श्रीकृष्णं गोपाङ्गनाश्च विनेति बोद्धव्यम्। अर्थात् निषेधः श्रीकृष्णं विहायान्यत्र एव। श्रृङ्गाररसप्रधाने नाटके राधिकया गोपाङ्गनाभिर्वा सह श्रीकृष्णस्य मिलनविहारादिकं युक्तम्। रूपेण चन्द्रिकायां तदुक्तम्-

"यत् परोढोपपत्योश्च गौणत्वं कथितं बुधैः।
तत्तु कृष्णश्च गोपीश्च विनेति प्रतिपादितम्॥"

[नाटकचन्द्रिका १०]

आलङ्कारिकैः परोढोपपत्योर्विषये यल्लघुत्वं प्रतिपादितं तत्तु प्राकृतनायके प्रयुक्तं भवति। न च श्रीकृष्णे।[13] आशयस्यास्य प्रमाणरूपेण नाटकचन्द्रिकायामुद्धृतं सुदेवकृतरसविलासग्रन्थस्य वचनम्। तत्रोच्यते-

"नेष्टा यदङ्गिनि रसे कविभिः परोढास्तद्गोकुलाम्बुजदृशाङ्कुलमन्तरेण।
आशंसया रसविधेरवतारितानां कंसारिणा रसिकमण्डलशेखरेण॥"

[रसविलासः]

उपसंहृतिः

संस्कृतनाट्यसाहित्ये विश्वनाथादिप्रसिद्धनाट्यतत्त्वविदां मते नाटकस्य नायको धीरोदात्तगुणान्वितः एव भवेत्, परन्तु श्रीकृष्ण एव आराध्यत्वात् परमपुरुषत्वाच्च वैष्णवानां मते स धीरललितादिगुणयुक्तोऽपि नाटकस्य नायको भवितुमर्हति। अथवा वैष्णवनाट्यग्रन्थानां नाटकत्वविषये सन्देहो भविष्यति।

तस्मादेवं स्वीकृते ललितमाधवादिनाट्यग्रन्थानां नाटकत्वं सिध्यति। सिद्धान्तोऽयं यन्नाटकस्य नायको धीरोदात्तगुणसम्पन्नो भवेत्। परन्तु यस्मिन्नाटके श्रीकृष्णो नायकः, तत्र स धीरललितगुणसम्पन्नोऽपि तस्य नायकत्वमङ्गीक्रियते। पुनः नायकविभागवर्णने तेषां स्वरूपकथने चावश्यं चन्द्रिकायाः वैलक्षण्यं विद्यते। दिव्यादिव्यदिव्यादिव्येषु त्रिविधनायकभेदेषु स्वतन्त्रा एका कल्पना विद्यते, या खलु राजर्षिदिव्यादिव्यादिप्रसिद्धभेदेभ्यो विलक्षणं किमपि सूचयति। अत्र श्रेष्ठनायकविषये भगवतः श्रीकृष्णस्य गरिमा प्रदर्शितः। न केवलं नाटकनायकस्य मौलिकलक्षणविभाजनान्यपि तु प्रसिद्धवैष्णवनाटकेभ्यः तदुदाहरणानि प्रमाणरूपेण प्रदत्तानि। नाटकस्य श्रेष्ठनायकविषयेऽपि अत्रापूर्वं मतं प्रदर्शितम्। तस्मान्नाटकचन्द्रिकायाः स्वातन्त्र्यमनस्वीकार्यम्। अतः परमाराध्यस्य श्रीकृष्णस्य श्रेष्ठत्वसम्पादनाय ललितमाधवादिवैष्णवनाटकानां नाटकत्वसिध्यर्थञ्च नाटकचन्द्रिकायां तदनुकूलनायकलक्षणविभागवैशिष्ट्यादयो विलिखिताः इति शिवम्।

## सन्दर्भाः-

1. अयं नेता सुरम्याङ्गः सर्वसलक्षणान्वितः। रुचिरस्तेजसा युक्तो बलीयान् वयसान्वितः॥ [भक्तिरसामृतसिन्धुः, दक्षिणः/१/२३]
2. प्रख्यातवस्तुविषयं प्रख्यातोदात्तनायकञ्चैव। राजर्षिवंशचरितं तथा च दिव्याश्रयोपेतम्॥ [नाट्यशास्त्रम् २०/१०]
3. वस्तुतः श्रीकृष्णः उदात्तनायकः एव, केवलं लीलावशात् ललितादयः गुणयुता भवन्ति भगवानिति भावः।
4. निश्चिन्तो मृदुरनिशं कलापरो धीरललितः स्यात्। [साहित्यदर्पणः ३/३४]
5. त्यागी कृती कुलीनः सुश्रिको रूपयौवनोत्साही। दक्षोऽनुरक्तलोकस्तेजोवैदग्ध्यशीलवान्नेता॥ [साहित्यदर्पणः ३/३०]
6. उदात्तताम् उदात्तनायकताम्। [ललितमाधवम्, विश्वनाथकृतटीका]
7. राजर्षिः ऋषियोग्यदयादाक्षिण्यक्षमादिगुणवान् राजा राज्याधिपतिः, न तु ऋषितुल्यक्षत्रियनृपतिः। [साहित्यदर्पणः, कुसुमप्रतिमाटीका]
8. हरिदाससिद्धान्तवागीश-कृष्णमोहनशास्त्रिप्रभृतयः।

9. उदयमस्तमयं च रघूद्वहादुभयमानशिरे वसुधाधिपाः। [रघुवंशम् ९/९]
10. दिव्येन वा मानुषेण धीरोदात्तेन संयुतम्। [रसार्णवसुधाकरः ३/१३०]
11. नराभिमानी नराभेदग्रहवान्। ईश्वरे नरत्वस्य वाधात् तादृशग्रहो भ्रम एव वाच्यः। स चेश्वरे न सम्भवतीति। तस्य नरचरिताचरणन्तु लोकशिक्षार्थं माययैव न तु नरत्वाभिमानात्। तदुक्तं पाद्मे- 'माया मानुषचारित्रो महादेवादि पूजितः' इति। श्रीमद्भागवते च 'भ्रात्रा वने कृपणवत् प्रियया वियुक्तः स्त्रीसङ्गिनाङ्गतिमिति प्रथमाञ्चकार' इति। तथा सति दिव्यादिव्यपदार्थ एवं वाच्यः- मानुष्यां देवेनोत्पादितो दिव्यादिव्यो यथा- युधिष्ठिरादिः। एवञ्च श्रीरामचन्द्रोऽपि दिव्यनायक एव।
12. परोढां वर्जयित्वा तु वेश्यां चाननुरागिणीम्। आलम्बनं नायिकाः स्युर्दक्षिणाद्याश्च नायकाः॥ [साहित्यदर्पणः ३/१८४]
13. लधुत्वमत्र यत् प्रोक्तं तत्तु प्राकृतनायके। न कृष्णे रसनिर्यासस्वादार्थमवतारिणि॥ [उज्ज्वलनीलमणिः, नाटकभेदप्रकरणम् २१]

## सहायकग्रन्थसूची


1. रूपगोस्वामी। (१९६४)। नाटकचन्द्रिका । शास्त्री, बाबूलालशुक्लः (सम्पा.)। वाराणसी-१ : चौखम्बा संस्कृत सीरीज आफिस।
2. रूपगोस्वामी। (२००६)। नाटकचन्द्रिका (रासविहारीसांख्यतीर्थेनानूदिता)। वन्द्योपाध्यायः, माणवेन्दुः (सम्पा.)। कलकाता-६ : सदेश।
3. रूपगोस्वामी। (१८९७)। ललितमाधवम् । वसु, सत्येन्द्रनाथः (अनु.)। कलिकाता : वसुमती साहित्य मन्दिर।
4. रूपगोस्वामी। (१९७०)। विदग्धमाधवम् । झा, रमाकान्तः (सम्पा.)। वाराणसी-१ : चौखम्बा संस्कृत सीरीज आफिस।
5. रूपगोस्वामी। (१९८९)। श्रीभक्तिरसामृतसिन्धुः (जीवगोस्वामिकृतया टीकया समेतः)। देवगोस्वामी, श्रीधरः (सम्पा.)। कलिकाता-५५ : श्रीचैतन्यसारस्वतकृष्णानुशीलनसङ्घः।
6. विश्वनाथः। (२०१५)। साहित्यदर्पणः (लक्ष्मीव्याख्याविभूषितः)। शास्त्री, कृष्णमोहनः (सम्पा.)। वाराणसी : चौखम्भा संस्कृत संस्थान।
7. विश्वनाथः। (१९९८)। साहित्यदर्पणः (श्रीरामचन्द्रतर्कवागीशकृतया टीकया समेतः)। द्विवेदः, दुर्गाप्रसादः (सम्पा.)। वाराणसी : वाराणसी चौखम्बा विद्याभवन।
8. विश्वनाथः। ( १९९८) । साहित्यदर्पणः, षष्ठपरिच्छेदः ( कुसुमप्रतिमाटीकासमेतः) । वन्द्योपाध्यायः, उदयः (सम्पा.)। कलकाता-६ : संस्कृत वुक डिपो।

9. भरतः। (१९९८)। नाट्यशास्त्रम्। उन्नि, एन्. पि (सम्पा.)। दिल्ली : नाग पाब्लिशार्स।

10. सिंहभूपालः। (१९१६)। रसार्णवसुधाकरः। गणपतिशास्त्री, टी (सम्पा.)। त्रिवान्द्राम् : त्रिवाङ्कुरमहाराजशासनम्।

11. कालिदासः। (२०१६)। रघुवंशम्। त्रिपाठी, कृष्णमणिः (सम्पा.)। वाराणसी : चौखम्बा सुरभारती प्रकाशन।

❋ ❋ ❋